International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(2): 157-159
© 2023 IJSR
www.anantaajournal.com
Received: 08-12-2023
Accepted: 11-01-2023

**खेमलाल शर्मा**
सहायकप्राद्यापकः, सरकारी संस्कृत महाविद्यालय, सामदोङ, भारत

**Corresponding Author:**
**खेमलाल शर्मा**
सहायकप्राद्यापकः, सरकारी संस्कृत महाविद्यालय, सामदोङ, भारत

# पाणिनीयव्याकरणस्य कर्तृकारकविमर्शः

**खेमलाल शर्मा**

**सारांश**
पाणिनिनेपालीव्याकरणे कर्ताकारकम् इति विषयमवलम्ब्य पाणिनिप्रणीतं सूत्रं यथा – '*स्वतन्त्र कर्ता*' इति क्रियायां स्वात्यन्त्रेण विवक्षितोऽर्थ कर्ता भवति। व्याकरणेऽस्मिन् कर्तुः त्रयः भेदाः सन्ति यथा- स्वतन्त्रः, प्रयोजकः, कर्मकर्ता च । स्वतन्त्रकर्तुरूदाहरणं यथा- रामो विद्यालयं गच्छति । इत्यत्र 'राम' इति स्वतन्त्रः कर्ता । प्रयोजककर्तुरुदाहरणं यथा – रामेण कार्यते । प्रयोजकः कर्ता 'रामो' वर्तते । कर्मकर्तुरित्यत्र यथा- राम कृष्णं गोकुलं गमयति इति । एवमेव अस्मिन आलेखे सप्रमाणमन्विश्य कर्तृकारकस्य विमर्शात्मकमध्ययनं कृतम् ।

**कूटशब्द** : तन्त्रः,विक्षितः, ण्यन्तः, अण्यन्तः।

## प्रस्तावना

वेदाङ्गेषु प्रथममिदम् अङ्गं व्याकरणम् । महाभाष्यकारस्य वचनमिदम् '*मुखं व्याकरणं स्मृतम्*' इति प्रसिद्धम्। 'वाक्यज्ञाने पदज्ञानकारणम्, पदज्ञाने प्रकृतिप्रत्यययोः कारणम्' इति स्वीकृत्य व्याकरणस्येदं लक्षणं प्रवर्तते – 'व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते अनेनेति व्याकरणम्'। अस्य शास्त्रस्य कारकप्रकरणस्य कर्तृकारकस्य विमर्शः मया कृत।

### पाणिनीयव्याकरणस्य कर्तृकारकविमर्शः

कर्ताकारकः विषये पाणिनिना सूत्रमेकमुदिरितम्, तदस्ति – '*स्वतन्त्र कर्ता*'[1]। अस्य सूत्रस्य वृत्तौ भट्टोजीदीक्षितेन विलिख्यते - '*क्रियायां स्वात्यन्त्रेण विवक्षितोऽर्थः कर्ता भवति*'[2] इति सिद्धान्तः। स्वतन्त्रम् इत्यस्य कोऽर्थः प्रश्नेऽस्मिन् स्वम्- आत्मानं तन्त्रम् – प्रधानम् अस्य इति स्वतन्त्रम्। यथा – रामो विद्यालयं गच्छति, इत्यत्र गच्छति क्रियायाः स्वात्यन्त्रेण विवक्षितोऽत्र 'रामः' यश्चात्र कर्तारूपेणापि अभिधीयते। स्वतन्त्रम् इत्यस्य पञ्चनामानि सन्ति। '*स्वतन्त्रघटकतन्त्रशब्दार्थः*'[3] अत्र तननं – तन्त्रम्, तन्यतेऽनेन वा तन्त्रम्, तन्त्रणं तन्त्र्यते वा तन्त्रम् "तन्त्रम्"शब्दः तनु विस्तारणे धातोः ष्ट्रन् प्रत्यये सति तन्त्रमिति शब्दः निष्पद्यते, अपि च तन्त्रि धारणे धातोः घञ् प्रत्ययेन साधनं मुकुटस्यासङ्गतम्, रक् प्रत्ययविधायकसूत्राभावात्, रकि नलोपापत्तेश्च। एवञ्च '*अन्यानधीनत्वरूपप्रधानार्थकः स्वतन्त्रः शब्दः' इति*'[4] अत्र कारकाधिकारात् क्रियाजनने कर्ता स्वतन्त्ररिति भावः। कर्ता कर्तृवाच्ये कर्मवाच्ये भावे वा सर्वत्र स्वतन्त्ररूपेण अवस्थीयते इति। उक्तञ्च-

*क्रियते च क्रिया येन क्रिया वा यत्र वर्तते ।*
*कर्ता भवति सः शब्दः कर्तरि प्रथमा ततः।*
*कर्तृभावं कथयितुं स्वार्थस्यात्र प्रदर्शने।*
*प्रथमा जायते नाम्नः रामः कृष्णः फलं रमा।*
*सु औ जस् प्रथमा अस्ति तत्रेतौ उश्च जस्तथा।*
*यस्य कस्यापि कार्यस्य करणे यत् स्वतन्त्रता।।*
*दृश्यते स च कर्तास्ति प्रथमा तत्र जायते*[5]*।।*

---

[1] पाणिनि अष्टाध्यायी १.४.५४ चौखम्बा संस्कृत प्रतिष्ठान् सन्१९९७
[2]. भट्टोजिदीक्षित वै. सि. कौमुदी कारक प्रकरण चौखम्बा संस्कृत प्रतिष्ठान् सन् २०१०
[3] पं सभापतिशर्मोपाध्याय .वै. सि. कौ. लक्ष्मीटीका पृष्ठ ८०4 मोतीलालवनारसीदास सन १९६६
[4]. पं सभापतिशर्मोपाध्याय .वै. सि. कौ. लक्ष्मीटीका पृष्ठ ८०4 मोतीलालवनारसीदास सन १९६६
[5].श्लोकसिद्धान्तकौमुदी पृ. २०५सम्पूर्णानन्दसंस्कृत विश्वविद्यालय वनानस सन्

सारल्येन व्यवहारिकभाषाज्ञानाय नियमोऽयं प्रकाश्यते यथा-

उक्ते कर्तरि प्रथमा अनुक्ते कर्मणि द्वितीया।
अनुक्ते कर्तरि तृतीया उक्ते कर्मणि प्रथमा भवति॥

कतृवाच्योदाहरणम्-

रामः पुस्तकं पठति।
स मन्दिरं गच्छति।
अहं कार्यं करोमि।
ते पत्रं पठन्ति।
यूयं कार्यं करिष्यथ।
वयं कार्यं करिष्यामः।

एतानि वाक्यानि वर्तमानकालिकानि कर्तृवाच्यानि वर्तन्ते।
*कर्मवाच्योदाहरणम्-*

रामेण पुस्तकं पठ्यते।
तेन मन्दिरं गम्यते।
मया कार्यं क्रियते।
तैः पत्रं पठ्यते।
युष्माभिः कार्यं क्रियते।
अस्माभिः धनं दृश्यते।
तै अहं प्रेष्ये।

एतानि वर्तमानकालाधिगतानि कर्तृवाच्यानां रूपाणि सन्ति। कर्तृवाच्ये उक्तकर्तृत्वात् प्रथमा भवति, क्रिया परस्मैपदस्य तद्वचनस्यैव भवति। अनुक्ते कर्तरि तृतीया भवति। तस्यामवस्थायां उक्ते कर्मणि प्रथमा भवति। यथा- उदाहरणम् - कर्तृवाच्ये- रामो गृहं गच्छति। कर्मवाच्ये - रामेण गृहं गम्यते। उभयत्र रामः कर्ता 'गमि' क्रियायां स्वात्यन्त्रेणावस्थितो वर्तते। भाववाच्येऽपि तथैवाचरति। उदाहरणम्- मया भूयते। भाववाच्ये कर्तृबहुवचनत्वेऽपि क्रिया एकवचनस्य भवति। कर्तुः का वृत्तिः? इत्यत्र सिद्धान्तकौमुदीलक्ष्मीटीकायामस्ति – धात्वर्थव्यपाराश्रयत्वेन विवक्षितः कर्ता इति। अपरञ्च-

*धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते।*
*स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः।*[6]

विवक्षे इति पदस्य शाब्दबोधः करणीयमस्ति, वक्तुरिच्छा– विवक्षा इति ।अत्र- स्थाली पचति।
स्थाल्या पचति। स्थाल्यां पचति। इत्येषां प्रयोगदर्शनात्।
अत्र लिखितमस्ति – धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते। अयञ्च कर्ता विविधा वर्णिता। १. शुद्धः कर्ता, २. प्रयोजको हेतु, ३. कर्मकर्ता चेति। एषां क्रमेणोदाहरणानि – मया हरिः सेव्यते। अत्र मया शब्दः कर्तास्ति। हरिणा कार्यते। हरिणा अयं कर्ता प्रयोजको हेतुः वर्तते। रामः कृष्णं गोकुलं गमयति, इति कर्मकर्तु उदाहरणमस्ति। कृष्ण इदं पदं ण्यन्तो वर्तते। यथा- *गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ*[7]। इति सूत्रेण गतिः- गत्यर्थकानां, बुद्धिः- बुध्यर्थकानां, प्रत्यवसानां – भक्षणार्थकाणां, शब्दकर्मः- शब्दकर्मकाणाम्, अकर्मकाः- अकर्मकाणां, अण्यन्तावस्थायाः कर्तुः ण्तावस्थायां कर्मसंज्ञा भवति।
यथा– अत्र *'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा*[8]' इति सूत्रमते कर्तृकर्माद्यर्थकप्रत्ययेन कर्तादिरुक्तत्वात्प्रथमायाः प्रातिपदिकार्थ एव। *"तस्य चाख्यातार्थकर्तादिनाऽभेदान्वयेन प्रथमार्थस्य कारकत्वमिति"*।[9] यथा – चैत्रो भवति, वाक्येऽस्मिन् चैत्रः कर्ताकारकः प्रसिद्ध इति। उक्तञ्च- *'यावन्ति लक्ष्याणि तावन्ति लक्षणानि'*[10]। इत्याख्येन ज्ञायते लक्षणोपप्लवपक्षे-धातुविषयक-लक्षार्थावृत्तः कर्तुरीप्सितेति सूत्रारम्भसामर्थ्यात् इत्यर्थपरतया भाष्यवचनम्। नियमस्तु गत्यादिसूत्रे अण्यन्तावस्थायाः कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा भवति चेद् गत्यादीनामेव। *'हेतुमति च'*[11] पाणिनीयसूत्रभाष्ये प्रयोजकव्यापारेण प्रयोज्यव्यापारस्य- ईप्सिततत्वेन कर्तुरितिपाचयत्योदनदेवदत्तेन इत्याशङ्क्य गतिबुद्धि. इति सूत्रं नियमार्थमिति नव्यसम्मतम्। एवञ्च *'आकडारादेका संज्ञा*[12]' इति सूत्रभाष्ये कडारात् परं कार्यम् इति पाठे गतिबुद्धि. इत्यादिना ण्यन्तानां कर्म कर्तृसंज्ञकमपि प्राप्नोति आरम्भसामर्थ्याच्च कर्मसंज्ञा परकार्यत्वाच्च कर्तृसंज्ञा प्राप्नोति इत्युक्तम्। अत्र भाष्ये आरम्भसामर्थ्यात् इत्युक्तिर्गत्यादिसूत्रस्य विधायकत्वे एवोपपद्यते। परञ्च – कुत्रचित् आरम्भसामर्थ्यात्। इयम् उक्ति असंगता भवति चेत् – कर्मसंज्ञासूत्रस्य कर्तृपदस्य स्वतन्त्रोपलक्षकत्वेन तस्य च *'हेतुमति च'*[13] इत्यत्रानुवृत्या कर्तृसंज्ञोपजीव्यत्वाभावेऽपि परत्वात् अन्तरङ्गत्वाच्च *'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ*[14]' इति सूत्रं पाणिनिना विरचितम्, अस्योदाहरणानि सिद्धान्तकौमुद्याम् यथा –

*शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्।*
*आशयच्चामृतं देवान् वेदमध्यापयद्विधिम्।*
*आसयत् सलिले पृथ्वीं यः सः मे श्रीहरिः गतिः*[15]।

उक्तश्लोके शत्रवः स्वर्गम् अगच्छन्। तान्- शत्रून् श्रीहरिः प्रेरयतीति। देवदत्तः शत्रून् स्वर्गम् अगमयत्। स्वः वेदार्थम् अविदुः। तान् श्रीहरिः प्रेरयतीति- हरिः स्वं वेदार्थम् अवेदयत्। देवा अमृतम् अश्नन्। तान् श्रीहरि आशयत्- रामः देवममृतमाशयत्। ब्राह्मणः वेदम् अध्यैत। तं विधिं श्रीहरिः प्रेयतीति- विधिं वेदम् अध्यापयत्। सलिले जले पृथ्वी अस्ति। तां श्रीहरिः आसयत्। विधिशब्दस्य अयं अर्थो भवति। *'विधिना नियतौ काले विधाने परमेष्ठिन*[16]। एवं रीत्या विधिशब्दस्य लक्षणमुपकृतम् अञ्यच्च *'गतिबुद्धि'*. इति सूत्रे गत्यादि किम्? यथा –

देवदत्तेन ओदनं पाचयति। (ण्यन्तः)
रामः पुत्रम् ओदनं खादयति।
देवदत्त ओदनं पचति। (अण्यन्तः)
पुत्र ओदनं खादति।

पचन्तं देवदत्तं चैत्रः प्रेरयति, इति। अत्र पच् धातोः अर्थः – सिद्ध्यनुकूलव्यापारः विक्लित्तिरूपं फलम् ओदनम् इति तस्य व्यापारस्य कर्मत्वम् अस्ति। अत्र प्रयोजककर्ता – चैत्रः। प्रयोज्यकर्ता – देवदत्तः। ण्यन्तः पाचि धातोः विक्लित्यानुकूलः व्यापार इति। अत्र प्रयोजकश्चैत्रनिष्ठः चरमव्यापार-जन्यप्रथमव्यापाराश्रयदेवदत्तरूपप्रयोज्यस्य कर्तुरिति प्राप्तकर्मत्वम्। परन्तु *'गतिबुद्धि'*. इति सूत्रोपदेशात् व्यावर्तते। *'णिजर्थव्यापारप्रयोज्यः व्यापाराश्रयस्य कर्मत्वं भवति चेत् ण्यन्तानां गत्यार्थकानां धातूनां योगे एव'*[17]। अण्यन्तानां किम्? एकस्मिन् वाक्ये प्रयोज्यत्वमप्यस्ति प्रयोजककर्तृत्वमप्यस्ति। द्वयोरेकाधिकरणात् तत्र कर्मसंज्ञा मा भूदिति।
देवदत्तेन यज्ञदत्तं गमयति तमपरः श्रीकृष्णः प्रेरयति अत्र- यज्ञदत्तः गच्छति, तं यज्ञदत्तं देवदत्तः गन्तुं प्रेरयतीति- देवदत्तः यज्ञदत्तं गमयति, तमपरः श्रीकृष्णः प्रेरयति इत्यवस्थायाम्- देवदत्तेन यज्ञदत्तं गमयति, इति प्रयोगः सिध्यति। श्रीकृष्णो देवदत्तेन

[6] पं सभापतिशर्मोपाध्याय .वै. सि. कौ. लक्ष्मीटीका पृष्ठ ८०४ मोतीलालवनारसीदास सन १९६६
[7] पाणिनि अष्टाध्यायी १.४.४२ चौखम्बा संस्कृत प्रतिष्ठान् सन्१९९७
[8]. पाणिनि अष्टाध्यायी ३.४.४६ चौखम्बा संस्कृत प्रतिष्ठान् सन्१९९७
[9] नागेश परमलघुमञ्जुषा पृष्ठः २५४ चौखम्बा सुरभारती सन्२००१
[10] पं सभापतिशर्मोपाध्याय .वै. सि. कौ. लक्ष्मीटीका पृष्ठ ७८५ मोतीलालवनारसीदास सन १९६६
[11] पाणिनि अष्टाध्यायी ३.१.२६ चौखम्बा संस्कृत प्रतिष्ठान् सन्१९९७
[12] पाणिनि अष्टाध्यायी १.४.१ चौखम्बा संस्कृत प्रतिष्ठान् सन्१९९७
[13].पाणिनि अष्टाध्यायी ३.१.२६ चौखम्बा संस्कृत प्रतिष्ठान् सन्१९९७
[14]. पाणिनि अष्टाध्यायी १.४.५२ चौखम्बा संस्कृत प्रतिष्ठान् सन्१९९७
[15] भट्टोजिदीक्षित वै. सि. कौमुदी कारक प्रकरण चौखम्बा संस्कृत प्रतिष्ठान् सन् २०१०
[16] भट्टोजिदीक्षित वै. सि. कौमुदी कारक प्रकरण चौखम्बा संस्कृत प्रतिष्ठान् सन् २०१०
[17] पं सभापतिशर्मोपाध्याय .वै. सि. कौ. लक्ष्मीटीका पृष्ठ ७८७मोतीलाल वनारसीदास सन १९६६

यज्ञदत्तं गमयति। अत्र देवदत्तस्य कर्मत्वं न इति नियमार्थम्[18]। षट्सु कारकेषु प्रथममिदं कारकम्। अत्र कारकसन्दर्भे- *'क्रियानिष्पादकत्वं कारकत्वमिति'*[19] कारकलक्षणं भजति नागेशः। तत्र क्रियानिष्पादकत्वे कारके कर्तुः लक्षणम् इदं वर्तते -*कर्तुः क्रियायाः स्वात्यन्त्रेण विवक्षितोऽर्थः*[20]। उक्तञ्च-*'निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके''*। *अन्यच्च- 'तत्र प्रकृतधातुवाच्यव्यापाराश्रयत्वं कर्तृत्वम्'* [21]। अन्य कारकनिष्ठो व्यापारस्तु न धातुवाच्यः। यथा – वह्निना पचति। एवञ्च अन्याधीनत्व रूपप्रधानार्थः स्वतन्त्रः शब्दः वर्तते। कारकाधिकारात् क्रियाजनने स्वतन्त्रः शब्दोऽवस्थितः। कर्मादिकारकाणां क्रियाजनने न स्वात्यन्त्र्यम्, कर्तृव्यापारः परतन्त्रत्वात्। यथा- चैत्रः तण्डुलान् पचति । अस्मिन् वाक्ये चैत्रः फूत्कारादिव्यापारं विधत्ते तदैव समवायेन विक्लित्तिम्प्रति तादात्म्येन तण्डुलः करणमिति चैत्रव्यापारजन्यानां पच्धात्वर्थविक्लिप्तौ ज्ञानविषयीत्वमेव व्यापारः इति कर्मादिकारकनिष्ठक्रियायाः पारतन्त्र्यम्। एवम् अन्यकारकेषु अपि (पारतन्त्र्यमागच्छति) [22] नागेशमते किं नाम स्वातन्त्र्यमित्यावस्थायां *'कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वम्'*[23]।

**उपसंहार**

अस्मिन् शोधपत्रे पाणिनिव्याकरणस्य कर्ताकारकस्य सभेदं सोदाहरणं प्रस्तुतम् । पाणिनिप्रणितं सूत्रं यथा-*'स्वतन्त्र कर्ता'* इति क्रियायां स्वात्यन्त्रेण विवक्षितोऽर्थ कर्ता। पाणिनिव्याकरणे स्वतन्त्रः, प्रयोजकः, कर्मकर्ता च इति भेदाः प्रतिपादिताः।

## संदर्भ सूची

1. वैयाकरणभूषणसारः कण्वभट्टःधात्वर्थनिर्णयः चौखम्बा संस्कृत प्रतिष्ठान वनारस सन् २००१
2. शाब्दबोधमीमांसा ताताचार्य एन एस रघुनाथन राष्ट्रीय संस्कृत संस्थान नई दिल्ली सन २००६

[18] पं सभापतिशर्मोपाध्याय .वै. सि. कौ. लक्ष्मीटीका पृष्ठ ७८७ मोतीलाल वनारसीदास सन १९६६
[19] परमलधुमञ्जुषा [19] नागेश परमलघुमञ्जुषा पृष्ठः २५४ चौखम्बा सुरभारती सन् २००१
[20] ताताचार्य एन एस रामानुज .शाब्दबोधमीमांसा राष्ट्रियसंस्कृ संस्थानम् नई दिल्ली सन् २००६
[21]. नागेश परमलघुमञ्जुषा पृष्ठः २५३ चौखम्बा सुरभारती सन् २००१
[22].वै. सि.कौ. ल. टी पृष्ठ १०१ पं सभापतिशर्मोपाध्याय .वै. सि. कौ. लक्ष्मीटीका पृष्ठ ८०4 मोतीलाल वनारसीदास सन १९६६
[23] कण्वभट्टः .वैयाकरणभूषणसार प्रभाटीका चौखम्बा सुरभारती सन २००१